# meghadUtasamasyAlekhaH by Meghavijaya

# મેઘદૂતસમસ્યાલેખઃ

## Document Information

Text title : Meghadutasamasyalekhah by Meghavijaya

File name : meghadUtasamasyAlekhaHmeghavijaya.itx

Category : major_works, jaina

Location : doc_z_misc_major_works

Author : Meghavijaya

Description/comments : A message to Meghavijaya's Jain Guru through Megha taking 4th line of each shloka of Kalidasa's MeghadUtaM as a Samasya pUrti

Latest update : August 18, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# મેઘદૂતસમસ્યાલેખઃ

meghadUta samasyAlekhaH of Meghavijaya.

In this Jain work, the author is sending a message to his Jain Guru through Megha. He has taken 4th line of each shloka of Kalidasa's MeghadUtaM as a Samasya, and composed three more lines to complete the samasya shloka, as a samasyA pUraNa. Thus, the 4th line of each shloka in both kAvyas are identical, though the stories are entirely different. The poetical metre of this work is mandAkrAntA, as expected.

NOTE: Another similar work, "pArshvAbhyudaya", a Jain philosophical work, by another Jain poet Jinadasa (8th century) is available, in which all the four lines in all the shlokas of KalidAsa's meghadUtTam, in the original order are used as a samasyA pUrana (so it is much larger than the present work). This work is of interest, since it embodies the oldest version of kAlidAsa's meghadUtam as it was availabe in the 8th century.

The introduction in the publication of the present work says the following:

અસ્મિઁલેખે કસ્મિઁશ્ચિત્પુરે ચાતુર્માસિકીસ્થિતિં કુર્વદ્ભિઃ
કવિભિર્મેઘદૂતદ્વારા
શ્રીદેવપત્તનસ્થતપગણપતિશ્રીમદ્વિજયપ્રભસૂરીશ્વરાણાં
કુશલવાર્તાદિસંસૂચકં વચિકં પ્રેષયદ્ભિર્દેવગિર્યાદીનાં
વર્ણનં કૃતમસ્તિ ॥

અથ મહામહોપાધ્યાયશ્રીમેઘવિજયવિરચિતો મેઘદૂતસમસ્યાલેખઃ ।

(મન્દાક્રાન્તાવૃત્તમ્)

સ્વસ્તિ શ્રીમદ્ભુવનદિનકૃદ્વીરતીર્થાભિનેતુઃ
પ્રાપ્યાદેશં તપગણપતેર્મેઘનામા વિનેયઃ ।
જ્યેષ્ઠસ્થિત્યાં પુરમનુસરન્ નવ્યરઙ્ગં સસર્જ
સ્નિગ્ધચ્છાયાતરુષુ વસતિં રામગિર્યાશ્રમેષુ ॥ ૧॥

તસ્યાં પુર્યાં મુનિગણગુરોર્વિપ્રયોગી સ યોગી
નીત્વા માસાન્ કદિચિદચિરાદ્વાચિકં નેતુકામઃ ।
ભાદ્રે પઞ્ચમ્યુદયદિવસે મેઘમાશ્લિષ્ટસૌધં
વપ્રક્રીડાપરિણતગજપ્રેક્ષણીયં દદર્શ ॥ ૨॥

મત્વા તસ્યાઽભ્યુદયનદશાં વાયુનોન્નીયમાનાં
ચેતો વાચં ઝટિતિ ગમનાપેક્ષમૂચેઽસ્ય સાધોઃ ।
પ્રત્યાસન્નેઽપ્યયિ ! તવ ગુરૌ કાર્યકાર્યાસ્તિ યોગઃ
કણ્ઠાશ્લેષપ્રણયિનિ જને કિં પુનર્દૂરસંસ્થે ॥ ૩॥

તદ્વિજ્ઞપ્ત્યૈ ત્વરય રયતઃ સ્વં પુનાનાઽઽશુનાના -
ભાવૈરેવં કિમિવ મનસોદીર્ણવાક્યઃ સ બાલઃ ।
હસ્તામ્ભોજદ્વયરચનયા નિર્મિતાર્ચાય તસ્મૈ
પ્રીતઃ પ્રીતિપ્રમુખવચનં સ્વાગતં વ્યાજહાર ॥ ૪॥

ક્વાયં પ્રાયઃ પવનસલિલજ્યોતિષાં સન્નિકાયઃ
ક્વાર્થશ્ચાયં પ્રવણકરણૈર્યો વિધેયઃ સમર્થઃ ।
હર્ષોત્કર્ષાદિતિ સ સહસા ચિન્તયન્નૂચિવાંસ્તં
કામાર્તા હિ પ્રકૃતિકૃપણાશ્ચેતનાચેતનેષુ ॥ ૫॥

જજ્ઞે ભૂમાવતિવિષમતાઽન્યોન્યસામ્રાજ્યદૌસ્થ્યા -
ત્કશ્ચિન્માં નો નયતિ યતિનામીશિતુર્વાર્ત્તવાર્ત્તામ્ ।
તત્ત્વાં યાચે સ્વવશમવશાસૃષ્ટિવિશ્વોપકારં
યાચ્ઞા મોઘા વરમધિગુણે નાધમે લબ્ધકામા ॥ ૬॥

ભ્રાતસ્ત્રાતસ્ત્વમસિ ભુવને જીવનં જીવનન્દી
તાપવ્યાપાપહૃતિનિપુણસ્તત્પયોવાહ ! રમ્યા ।
ગમ્યા ચારૈ રુચિરનગરી દેવકાત્પત્તનાખ્યા
બાહ્યોદ્યાનસ્થિતહરશિરશ્ચન્દ્રિકાધૌતહર્મ્યા ૭॥

નિત્યં ચેતઃ સ્ફુરતિ ચરણામ્ભોજયોઃ સૂરિરાજઃ

કાયઃ સર્વૈઃ સમયવિષયૈઃ સન્નિબદ્ધાન્તરાયઃ
નો ચેદીદૃગ્ગુરુસુરતરું પ્રાપ્ય કઃ સ્યાદ્વીયાન્
ન સ્યાદન્યોઽપ્યહમિવ જનો યઃ પરાધીનવૃત્તિઃ ॥ ૮॥

શ્રેયસ્યર્થે પ્રભવતિ બલાદન્તરાયસ્તદસ્ય
પ્રધ્વંસાયાભ્યુચિતમચિરાદાચિરેયં ભજસ્વ ।
લાભોઽપ્યત્ર ત્રિદશલલનાનેત્રસંવીક્ષણૈસ્ત્વાં
સેવિષ્યન્તે નયનસુભગં ખે ભવન્તં બલાકાઃ ॥ ૯॥

॥ અથ પ્રાપ્તનુષઙ્ગં શ્રીશાન્તિજિનવર્ણનમ્ ॥

દેવઃ શાન્તિર્ભવતિ ભવિનાં દુર્ભવામ્ભોધિસેતુ -
ર્હેતુર્ભૂયોઽનુભવભવ (?) ભોગસંયોગલક્ષ્મ્યા । one syllable (guru) missing
દુષ્ટૈઃ કષ્ટૈર્વ્યયભયમયૈઃ સન્નિયોગેઽઙ્ગભાજઃ
સદ્યઃપાતિ પ્રણયિહૃદયં વિપ્રયોગે રુણદ્ધિ ॥ ૧૦॥

અસ્યાહ્વાનસ્મરણકરણોદ્ભૂતભૂયઃપ્રભાવાઃ
શ્રદ્ધાભાજો વિતતમુરજસ્યેવ ગર્જં નિશમ્ય ।
નૃત્યારમ્ભે જિનપતિપુરઃ સજ્જિગીષો સ્વરુચ્યા
સમ્પત્સ્યન્તે નભસિ ભવતો રાજહંસાઃ સહાયાઃ ॥ ૧૧॥

અર્હત્યસ્મિન્ સૃજતિ ભુવનોદ્ભાસનં દીપરૂપે
ચેતોવૃત્તીર્બહલતમસશ્છેદનાય પ્રપદ્ય ।
સ્યાત્તત્રાભિપ્રણતમનુજસ્વર્ગિવર્ગસ્ય ચિત્રં
સ્નેહવ્યક્તિશ્ચિરવિરહજં મુઞ્ચતો વાષ્પમુષ્ણમ્ ॥ ૧૨॥

હર્ષાદ્વર્ષાવિહિતહિતકૃત્સ્નાત્રકૃત્યઃ પ્રસૂનૈ -
ર્વાતાનીતૈઃ પ્રણયતુ વિભોશ્ચારુચર્યાં સપર્યામ્ ।
કુર્વન્નુર્વીં સ્વતનુમતનું તીર્થભાવાશ્રિતાનાં
ક્ષીણઃ ક્ષીણઃ પરિલઘુપયઃ સ્રોતસં ચોપભુજ્ય ॥ ૧૩॥

દેવસ્યાસ્ય પ્રસવસમયે દિક્કુમારીભિરુચ્ચૈ -
ર્ગન્ધામ્ભોદઃ પ્રસૃમરસુમાઽઽમોદશાલી વિચક્રે ।
પિત્રા તત્રાર્જિતસુકૃતતતો વિશ્વશીર્ષે ત્વમેષિ
દિઙ્નાગાનાં પથિ પરિહરન્ સ્થૂલહસ્તાવલેપાન્ ॥ ૧૪॥

ઉદ્યદ્બાલારુણઘૃણિગણોન્મિશ્રશુદ્ધાશ્મગર્ભ -

ચ્છત્રેણૈતાં તનુમનુદિનં ભાસિતામસ્ય પશ્ય ।
મન્દારદ્રુપ્રભવનિચયૈઃ પથ્યનેપથ્યભાજો
બર્હેણેવ સ્ફુરિતરુચિના ગોપવેષસ્ય વિષ્ણોઃ ॥ ૧૫॥

શ્યામીભાવં શમયિતુમના વામભાગે વિતત્યા
પ્રાદક્ષિણ્યં નય ગુરુમુરુશ્રેયસા દેવમેનમ્ ।
નૃત્યાસક્તામરવરવધૂવેષવસ્ત્રાયમાણઃ
કિઞ્ચિત્પશ્ચાદ્વ્રજ લઘુગતિર્ભૂય એવોત્તરેણ ॥ ૧૬॥

શઙ્કે રાકાતુહિનકિરણો વૈશ્વસેનિસ્વરૂપા -
ઙ્કે પૂજાસ્પદમિહ મૃગં સ્વસ્ય સંવાહકં ખે ।
ન ક્ષુદ્રેઽપિ પ્રથમસુકૃતોદ્ભાવજન્મોપકારઃ
પ્રાપ્તે મિત્રે ભવતિ વિમુખઃ કિં પુનર્યસ્તથોચ્ચૈઃ ॥ ૧૭॥

રઙ્કુશ્ચન્દ્રં જિનમુખવિભામોષસઞ્જાતદોષં
પાદામ્ભોજે મખરમિષતોઽભ્યાનયત્સપ્રસાદમ્ ।
સ્વીયોત્સઙ્ગે તદિવ હરિણો ધીયતે શીતભાસા
સદ્ભાવાર્દ્રઃ ફલતિ ન ચિરેણોપકારો મહત્સુ ॥ ૧૮॥

ગાયન્તીનાં જિનવરપુરશ્ચારુલીલાવતીનાં
રૂપોત્પ્રેક્ષાવિવશમનસિ ત્વય્યથાગ્રં પ્રપન્ને ।
પ્રાપ્તઃ સ્વાહાશનજનમનઃકામ્યતાં મણ્ડપોઽપિ
મધ્યે શ્યામઃ સ્તન ઇવ ભુવઃ શેષવિસ્તારપાણ્ડુઃ ॥ ૧૯॥

નાનારત્નાભરણકિરણૈર્ભૂષિતાં ધૂષિતાર્ચ્યાં
જૈનીમર્ચાં તવ વિનમતઃ કાઽપિ કાન્તિર્ભવિત્રી ।
યામાલિક્યાભિનવનવનૈર્વર્ણયિષ્યન્તિ સિદ્ધાઃ
ભક્તિચ્છેદૈરિવ વિરચિતાં ભૂતિમઙ્ગે ગજસ્ય ॥ ૨૦॥

તસ્યાઃ સ્નાત્રે દનુજમનુજૈર્ગાત્રપાવિત્ર્યહેતૌ
સૃષ્ટે દિષ્ટ્યા પ્લુતમવિરલં ક્ષીરમાદેયમેવ ।
તન્માહાત્મ્યાત્પવનયવનસ્તેઽભિભૂત્યૈ પ્રભુર્ન
રિક્તઃ સર્વો ભવતિ હિ લઘુઃ પૂર્ણતા ગૌરવાય ॥ ૨૧॥

લોકાઃ કુષ્ઠાદ્ગલિતવપુષો નિર્વિરોકાઃ સશોકાઃ
અર્હત્સ્નાત્રામૃતભરસરઃસ્નાતમાત્રાઃ ક્ષણેન ।
ભૂત્વા ભાસ્વલ્લલિતતનવો દિવ્યભોગૈર્ભજન્તિ

સોત્કણ્ઠાનિ પ્રિયસહચરીસમ્ભ્રમાલિઙ્ગિતાનિ ॥ ૨૨॥

॥ ઇતિ જિનવર્ણનમ્ ॥

નાસ્મિન્માર્ગેऽસ્મ્યહમથિ ! ગતસ્તચ્ચ યાત્રાનુવેશ્મ
ગત્વા શ્રાદ્ધાઃ સદયહૃદયાઃ સમ્પદાં સંપ્રદાયાઃ ।
પ્રષ્ટવ્યાસ્તે ગુરુમુખઘનાન્નિર્ગલદ્વાગ્જલાનાં
સારઙ્ગાસ્તે જલલવમુચઃ સૂચયિષ્યન્તિ માર્ગમ્ ॥ ૨૩॥

રત્નશ્રેણીરચિતનિચિતસ્વર્ણસઙ્કીર્ણસૌધે -
ષ્વસ્યાં જાલન્તરપરિલસલ્લોલનેત્રાકલાપૈઃ ।
શુક્લાપાઙ્ગૈર્મધુરવચનૈર્વન્દનાં વક્તુકામૈઃ
પ્રત્યુદ્યાતઃ કથમપિ ભવાન્ ગન્તુમાશુ વ્યવસ્યેત્ ॥ ૨૪॥

વૃષ્ટે હ્યત્ર ત્વયિ પ્રતિગૃહં કેતકોત્સેધહેતૌ
ધારાયન્ત્રાવલય ઉદિતોત્તુઙ્ગરઙ્ગત્તરઙ્ગાઃ ।
અન્તર્મજ્જત્સરસિજદૃશાં વક્ત્રપદ્મૈઃ સપદ્માઃ
સમ્પત્સ્યન્તે કતિપયદિનસ્થાયિહંસા દશાર્ણાઃ ॥ ૨૫॥

પ્રસ્થાનાર્થં તવ સવયસં પ્રાર્થયસ્વાર્થવન્તં
કાસારં તં જલજરજસા પીતવાસો વસાનમ્ ।
સિન્ધ્વા વધ્વા અધરમધુરં યઃ પિબત્યુન્નમય્ય
સભ્રૂભઙ્ગં મુખમિવ પયો વેત્રવત્યાશ્ચલોર્મિ ॥ ૨૬॥

સ્થિત્વા તીરે ધ્રુવમુપસરચ્ચઞ્ચલાચઞ્ચલાક્ષીઃ
ધારાહસ્તૈઃ કુસુમમધુરાં દર્શયેસ્તાં વનાલીમ્ ।
યા પ્રાયોગ્યૈઃ સુરતલલિતપ્રક્રિયાણાં પ્રિયાણા -
મુદ્દામાનિ પ્રથયતિ શિલાવેશ્મભિર્યૌવનાનિ ॥ ૨૭॥

સંસ્થાનેન પ્રહિતમતુલં વીક્ષ્ય પક્વાન્નવૃન્દ -
મુદ્યાનેऽપિ સ્વતરુષુ ચલચ્છાખિકાનાં મિષેણ ।
પુષ્પશ્રેણીં પ્રહિતુમનસિ (?) પ્રોન્નતાનાં સમેધિ
ચ્છાયાદાનાત્ ક્ષણપરિચિતઃ પુષ્પલાવીમુખાનામ્ ॥ ૨૮॥

અસ્યાં પુર્યાં નરપતિનમન્મૌલિમાલાર્ચિતાંઘ્રિઃ
સાહેઃ પુત્રઃ સુનયનયનઃ પાતિ લોકાન્ પિતેવ ।
ગીર્વાણસ્ત્રીસદૃશસુદૃશાં તસ્ય સૌધોર્દ્ધ્વગામી

લોલાપાઙ્ગૈર્યદિ ન રમસે લોચનૈર્વઞ્ચિતોઽસિ ॥ ૨૯॥

નાર્યઃ પુર્યાં પ્રતિગૃહમિહ શ્રેણિમાપૂર્ય તૂર્યૈ -
રુદ્દિશ્યેયં પ્રનયરચિતં ગાનમુત્તાનયન્તિ ।
શ્રુત્વા તાસ્ત્વાં રસિતમસિતૈર્મોહયિષ્યન્ત્યપાઙ્ગૈઃ
સ્ત્રીણામાદ્યં પ્રણયવચનં વિભ્રમો હિ પ્રિયેષુ ॥ ૩૦॥

રોદસ્યોસ્ત્વાં પરિચિતમિતિ સ્વીયચિત્તેઽવધૃત્ય
સીમન્યસ્યાઃ કૃષિકરજના બીજરાજીં વિતેનુઃ ।
સંપ્રત્યેષાઽઙ્કુરમુકુલનૈઃ પ્રાઞ્જલીભૂય નમ્રા
કાર્શ્યં યેન ત્યજતિ વિધિના સ ત્વયૈવોપપાદ્યઃ ॥ ૩૧॥

ધન્યોઽસિ ત્વં જલદપટલે ! દક્ષિણસ્યાં પ્રવિશ્ય
દૃષ્ટં યેન પ્રવરનગરં સારમેતજ્જગત્યાઃ ।
ભુક્તે ભાગ્યે  ભુવિ નુ મરુતાં દેવશૈલાદ્વિધાઽપિ
શેષૈઃ પુણ્યૈર્હૃતમિવ દિવઃ કાન્તિમત્ખણ્ડમેકમ્ ॥ ૩૨॥

અત્રાશ્લેષ્ટું કમલવદના વીચિહસ્તૈઃ સરસ્યઃ
પ્રોક્તાઃ કાન્તા ઇવ સુવયસાં ત્વાં વિજાનન્તિ શબ્દૈઃ ।
મુક્ત્વા નસ્ત્વં વિરહવિધુરાઃ કુત્ર ગન્તાસિ ભોગ્યોઽ
સિ પ્રાવાતઃ પ્રિયતમ ઇવ પ્રાર્થનાચાટુકારઃ ॥ ૩૩॥

અસ્યાં મુક્તામરકતપવિશ્રીપ્રસૂનેન્દુરત્ન -
પૂગાન્  દૃષ્ટ્વા તરણિશશિનોઃ શ્રાન્તકાન્તિસ્વરૂપાન્ ।
પુણ્યશ્રેણીવિપણિગણિતાણ્ વિદ્રુમચ્છેદરાશીન્
સંલક્ષ્યન્તે સલિલનિધયસ્તોયમાત્રાવશેષાઃ ॥ ૩૪॥

॥ ઇત્યવરઙ્ગાવાદવર્ણનમ્  ॥

અસ્યાઃ પ્રાચ્યા સુભગભગિની દેવગિર્યાહ્વયાસ્તિ
પૂર્વં પ્રત્યાશ્રયમિહ ચિરં તસ્થિવાન્ રામચન્દ્રઃ ।
સસ્નૌ સ્નેહાદિહ જનકજા લક્ષ્મણઃ કેલિમાધા -
દિત્યાગન્તૂન્ રમયતિ જનો યત્ર બન્ધૂનભિજ્ઞઃ ॥ ૩૫॥

તસ્યાં છત્રાયિતસુરગિરૌ વપ્રમૌલિં દધત્યાં
રાજ્ઞસ્તૂર્યૈર્દ્વિગુણિતરવૈર્નર્ત્તયેથા મયૂરાન્ ।
ગેહેષૂચ્ચૈઃ પ્રસવનિચયાકીર્ણમધ્યેષુ નૂનં

નીત્વા ખેદં લલિતવનિતાપાદરાગાઙ્કિતેષુ ॥ ૩૬॥

એતત્પુર્યાઃ પુરપરિસરાદમ્રકમ્રાતપત્રા -
ત્તત્રાસીનો નગરસુષમાં માર્ગયાદ્રૌ વિનિદ્રામ્ ।
કાસારાણાં વિકચકમલામોદિભિઃ સેવ્યમાન -
સ્તોયક્રીડાનિરતયુવતિસ્નાનતિક્તૈર્મરુદ્ભિઃ ॥ ૩૭॥

સ્નાત્રે શ્રાદ્ધૈસ્ત્રિભુવનગુરોસ્તત્ર નિર્મીયમાણે
નાનારત્નાંશુકરચનયા ભૂષિતે ભૂમિભાગે ।
સદ્યો વાદ્યાનુચરચરિતૈઃ શબ્દયન્નબ્દરત્ન -
મામન્દ્રાણાં ફલમવિકલં લપ્સ્યસે ગર્જિતાનામ્ ॥ ૩૮॥

પીનોત્તુઙ્ગસ્તનભરનતા ગાત્રસૌન્દર્યભાજો
વામાઃ પુષ્પૈર્વૃષભભગવત્પૂજનં કર્ત્તુકામાઃ ।
મૂર્ત્તેઃ સ્નાનાદિવ સમુચિતાન્ પ્રાપ્ય વર્ષાગ્રબિન્દૂ -
નામોક્ષ્યન્તે ત્વયિ મધુકરશ્રેણિદીર્ઘાન્ કટાક્ષાન્ ॥ ૩૯॥

આશ્લેષાર્થં સુહૃદિવ ગિરિઃ શાખિબાહૂન્ વિતત્ય
તત્રાર્ચાસ્તાસ્તવ વિરચયિષ્યત્યનર્ઘ્યપ્રસૂનૈઃ ।
ગૃહ્ણન્ જન્માપ્યવિરલફલં માનયિષ્યત્યમર્ત્ત્યૈઃ
શાન્તોદ્વેગસ્તિમિતનયનં દૃષ્ટભક્તિર્ભવાન્ યાઃ ॥ ૪૦॥

તારુણ્યેન સ્મરપરવશાં શિક્ષિતાનાં પ્રવૃત્તિં
રાત્રૌ સ્ત્રીણામુપપતિગતૌ શ્રોણિભારાલસાનામ્ ।
દેહ્યાલમ્બં વિમલતડિતા દર્શયંસ્તત્ર માર્ગં
તોયોત્સર્ગસ્તનિતમુખરો મા સ્મ ભૂર્વિક્લવાસ્તાઃ ॥ ૪૧॥

ઇત્યેતસ્માન્નગરયુગલાદ્વીક્ષ્ય કેલિસ્થલં ત્વ -
મીલોરાદ્રૌ સપદિ વિનમન્પાર્શ્વમીશં ત્રિલોક્યાઃ ।
ભ્રાતઃ ! પ્રાતર્વ્રજ જનપદસ્ત્રીજનૈઃ પીયમાનો
મન્દાયન્તે ન ખલુ સુહૃદામભ્યુપેતાર્થકૃત્યાઃ ॥ ૪૨॥

તામુદ્યન્તં નભસિ સહસાઽવેક્ષ્ય કાન્તાં વિયુક્તા -
સ્ત્રાસવ્યાસં દધતિ સરસાં પાર્શ્વમસ્માજ્જહીહિ ।
રાત્રૌ મ્લાના ઇહ કમલિનીર્મોટિતું ભાનુમાલી
પ્રત્યાવૃત્તસ્ત્વયિ કરરુધિ સ્યાદનલ્પાભ્યસૂયઃ ॥ ૪૩॥

માર્ગે યાન્તં બહુલસલિલૈર્દાવવહ્નિપ્રશાન્તે -
ર્ગોત્રૈઃ ક્લ્પ્તોપકૃતિસુકૃતં રક્ષિતું ત્વાં નિયુક્તાઃ ।
નદ્યસ્તાસાં પ્રચિતવયસામર્હસિ ત્વં ન ધૈર્યા -
ન્મોઘીકર્તું ચટુલશફરોદ્વર્તનપ્રેક્ષિતાનિ ॥ ૪૪॥

કાચિત્ કાન્તા સરિદિહ તવ પ્રેક્ષ્ય સૌભાગ્યભઙ્ગી -
મઙ્ગીકુર્યાચ્ચપલસલિલાવર્ત્તનાભિપ્રકાશમ્ ।
ચક્રોરોજાવરુણકિરણાચ્છાદનાત્પીડયાસ્યાઃ
જ્ઞાતાસ્વાદો વિપુલજઘનાં કો વિહાતું સમર્થઃ ॥ ૪૫॥

વર્ત્મન્યસ્મિન્ વિવિધગિરયસ્ત્વત્પરિસ્યન્દમન્દી -
ભૂતોત્તાપાઃ ક્ષિતિરુહદલૈસ્તેઽપનેષ્યન્તિ ખેદમ્ ।
પુષ્પામોદી કરિકુલશતૈઃ પીયમાનસ્તવાતઃ
શીતો વાયુઃ પરિણમયિતા કાનનોદુમ્બરાણામ્ ॥ ૪૬॥

ગત્યૌત્સુક્યેઽપ્યણિકિટણકીદુર્ગયોઃ સ્થેયમેવ
પાર્શ્વઃ સ્વામી સ ઇહ વિહૃતઃ પૂર્વમુર્વીશસેવ્યઃ ।
જાગ્રદ્રૂપે વિપદિ શરણં સ્વર્ગિલોકેઽભિવન્દ્ય -
મત્યાદિત્યં હુતવહમુખે સમ્ભૃતં તદ્ધિ તેજઃ ॥ ૪૭॥

ઉત્પત્ત્યાસ્માત્પ્રણમ વિપુલે તુઙ્ગિ આ શૈલશૃઙ્ગે Note તુઙ્ગિ આ ઇતિ નામ ।
રામં કામં શ્રમણવૃષભં બોધિતારં પશૂનામ્ ।
તત્સમ્બુદ્ધાન્વયજશિખિનો મૂર્ત્તિમસ્યાભિષિચ્ય
પશ્ચાદદ્રિગ્રહણગુરુભિર્ગર્જિતૈર્નર્ત્તયેથાઃ ॥ ૪૮॥

વર્ષાભિસ્તે શિખિરશિખરાદ્ગૈરિકાણાં પ્રવાહૈઃ
સિન્ધુઃ પૂર્ણા હ્યવનિવનિતાચઙ્ગનીરઙ્ગિકેવ ।
જ્યેષ્યત્યેષ્યન્નવજલભરાસઙ્ગમોત્ફેનરાશિઃ
શ્રોતોમૂર્ત્યા ભુવિ પરિણતાં રન્તિદેવસ્ય કીર્તિમ્ ॥ ૪૯॥

ઉત્તીર્યાથ ત્વયિ શિખરિણાં ધોરણેર્નિમ્નભાવા -
લ્લીને ભૂમાવિવ જલલલચ્છૈવલિન્યોઃ પ્રસઙ્ગે ।
દ્રક્ષ્યન્ત્યોઘં ત્રિદશવનિતાઃ સ્નિગ્ધતાપાત્રનેત્રૈ -
રેકં મુક્તાગુણમિવ ભુવઃ સ્થૂલમધ્યેન્દ્રનીલમ્ ॥ ૫૦॥

એષ્યત્યગ્રેઽભ્યુદયકમલામન્દિરં બન્દિરં શ્રી -
સૂર્યાખ્યં તે નયનવિષયં સ્વર્ણપૂર્ણં ક્રમેણ ।

સઙ્ગન્તાસ્મિન્ સુહૃદપિ ઘનો માલવાન્તે સ્વગાત્રં
પાત્રીકુર્વન્ દશપુરવધૂનેત્રકૌતૂહલાનામ્ ॥ ૫૧॥

સભ્યેભ્યાનામહમહમિકાવૃદ્ધસૌધાગ્રરત્નૈ -
રાતિથ્યં તે બહુ વિરચયન્માનયેસ્તત્ પુરાપિ ।
હેમૈઃ શ્રાદ્ધવ્રજ ઇહ ગુરોરાગમે માર્ગણાનાં
ધારાપાતૈસ્ત્વમિવ કમલાન્યભ્યવર્ષન્મુખાનિ ॥ ૫૨॥

શ્રીમાન્ પાર્શ્વપ્રભુરિહ જયત્યગ્રજાગ્રત્પ્રભાવ -
સ્તસ્ય સ્નાત્રામૃતસમુદયૈઃ પૂયતે તાપિકાઽપિ ।
સંસૃજ્યૈનાં રુચિરરમણીસ્નાનકર્પૂરપૂર્ણા -
મન્તઃશુદ્ધસ્ત્વમપિ ભવિતા વર્ણમાત્રેણ કૃષ્ણઃ ॥ ૫૩॥

તસ્માદ્ગચ્છેરનુ ભૃગુપુરં સિન્ધુબન્ધુપ્રસક્તા -
મદ્રેર્બાહામિવ શશિસુતાં પૂર્વગઙ્ગેતિ નામ ।
રક્ષન્તી યા પ્રસૃમરજટાઘટ્ટદમ્ભાદ્ઘટસ્ય
શમ્ભોઃ કેશગ્રહણમકરોદિન્દુલગ્નોર્મિહસ્તા ॥ ૫૪॥

રેવાતીરે ભૃગુપુરવરસ્ફાટિકાવાસરાજી
તસ્યા બિમ્બં વિમલસલિલે સ્વર્ધુનીવાઽપરાઽસ્તિ ।
તત્ર ચ્છાયા પરતટમથાલમ્બતે તે તદૈષા
સ્યાદસ્થાનોપગતયમુનાસઙ્ગમેનાભિરામા ॥ ૫૫॥

અગ્રે દૃષ્ટ્વા જલમયમહીવન્મહીનામસિન્ધું
સિન્ધોરૂર્મીપૃથુતરભુજૈર્ગાઢમાલિઙ્ગ્યમાનામ્ ।
લબ્ધા સ્તબ્ધાબ્ધિકફનિચયાભ્યાસવર્ત્તી હિમાદ્રૌ
શોભાં શુભ્રત્રિનયનવૃષોત્ખાતપઙ્કોપમેયામ્ ॥ ૫૬॥

સ્થાને સ્થાને સરણિધરણીભૃદ્ભિરાગૃહ્યમાણા
તન્વી ખેદાદુપપતિ સરેત્તર્હિ નીરૈસ્તથાઽસ્યાઃ ।
કુર્યાઃ પૌષ્ટ્યં સ્ખલતિ ન યથા ભૂષિતા ચક્રરત્નૈ -
રાપન્નાર્તિપ્રશમનફલાઃ સમ્પદોઽહ્યુત્તમાનામ્ ॥ ૫૭॥

ઉત્તીર્ણસ્તાં હરિગૃહપુરં પ્રાપ્ય તત્કૌતુકાર્થી
વ્યાલમ્બેથા મણિમયશિલાપ્રૌઢસભ્યાલયાલીમ્ ।
યત્તે દ્વિષ્ટાઃ પવનયવનાસ્તત્ર ભઙ્ગં લભન્તે
કે વા ન સ્યુઃ પરિભવપદં નિષ્ફલારમ્ભયત્નાઃ ॥ ૫૮॥

તત્ર વ્યક્તં દૃષદિ ચરણન્યાસમાસજ્ય પૂજ્યં
રાજ્યાધીશૈર્વિજયપદતઃ સેનસૂરેર્ભજસ્વ ।
તીર્ણાન્યન્યાન્યપિ સુમનસો યાનિ દૃષ્ટ્વૈવ ભવ્યાઃ
સઙ્કુલ્પન્તે સ્થિરગણપદપ્રાપ્તયે શ્રદ્ધાનાઃ ॥ ૫૯॥

સ્રીવક્ત્રાબ્જે ભ્રમરલલિતં સુભ્રુવો પ્રેક્ષ્ય તત્ર
કાન્તારેઽબ્ધેસ્તટમનુસરેસ્સાભ્રમત્યાઃ પ્રસઙ્ગિ ।
વીચીનૃત્યૈસ્તવ ઘનરવૈર્વેણુવાદૈર્જનસ્ય
સઙ્ગીતાર્થો નનુ પશુપતેસ્તત્ર ભાવી સમગ્રઃ ॥ ૬૦॥

સિન્ધોર્વેલાશિખરિષુ તવાભ્યાગમાત્પુષ્પિતેષુ
સ્થિત્વા રાત્રાવવિરતરતશ્રાન્તવિદ્યુદ્વધૂકઃ ।
કિઞ્ચિત્સાચીકૃતનિજતનુઃ પશ્ચિમામાશ્રયેથાઃ
શ્યામઃ પાદો બલિનિયમનાભ્યુદ્યતસ્યેવ વિષ્ણોઃ ॥ ૬૧॥

સૌરાષ્ટ્રીણાં હૃદિ વિરચયન્ બિન્દુભિર્મૌક્તિકાલીં
પાવિત્ર્યાર્થં નનુ નિજતનોઃ સિદ્ધશૈલં ભજેથાઃ ।
યઃ શ‍ૃઙ્ગસ્થોન્નતજિનગૃહચ્છત્રગૌરાંશુભાસિ
રાશીભૂતઃ પ્રતિદિશમિવ ત્ર્યમ્બકસ્યાટ્ટહાસઃ ॥ ૬૨॥

મન્યે નન્તું વૃષભભગવત્પાદયુગ્મામ્બુજન્મ
તત્રારૂઢે ત્વયિ શિખરિણઃ સ્નિગ્ધવેણીસવર્ણે ।
ભૃઙ્ગવ્યાપ્તાવિવ હિ કુમુદસ્તસ્ય શોભા ભવિત્રી -
મંસન્યસ્તે સતિ હલભૃતો મેચકે વાસસીવ ॥ ૬૩॥

ગન્ધાલીઢૈઃ કુસુમસલિલૈઃ પૂજનાયાં જિનેન્દો -
ર્વૃન્દેઽલીનાં સ્ફુરતિ પરિતો ભાવિની કાઽપિ શોભા ।
ભાવાર્હન્ત્યે ચિકુરનિચયે વાઞ્જનાભે સલીલા -
મંસન્યસ્તે સતિ હલભૃતો મેચકે વાસસીવ ॥ ૬૪॥ -
(પાઠાન્તરમ્)

સમ્પૂજ્યાઽઽરાત્રિકરચનયા વિદ્યુતો મારુદેવં
સ્તોત્રૈર્મન્દ્રધ્વનિતજનિતૈશ્ચાભિનન્દ્યાત્મશુદ્ધ્યૈ ।
અભ્રૌ સ્ત્રીણાં વિષમસરણૌ શ્રોણિભારાલસાનાં
સોપાનત્વં કુરુ મણિતટારોહણાયાગ્રયાયી ॥ ૬૫॥

આસ્થાય શ્રીવૃષભવિભુના સોયમષ્ટાપદાભઃ
પૂતસ્તેનાત્મનિ જલભૃતે માનસત્વં વિદધ્યાઃ ।
યાસ્તત્રાર્હન્મહનવિધયે સ્વર્વશા સ્નાન્તિ નૈવ
ક્રીડાલોલાઃ શ્રવણપરુષૈર્ગર્જિતૈર્ભાપયેસ્તાઃ ॥ ૬૬ ॥

વર્ષોત્કર્ષૈર્દ્રૂમસમુદયે વિદ્રુમાભાં વિતન્વન્
મત્વા સિદ્ધસ્થલમનુપદં નર્ત્તયન્ મોરસાર્થાન્ ।
નિત્યં શત્રુઞ્જયમનુનયન્ વાતલૂનૈઃ પ્રસૂનૈ -
ર્નાનાચેષ્ટૈર્જલદ ! લલિતૈર્નિર્વિશેસ્તં નગેન્દ્રમ્ ॥ ૬૭ ॥

ઉદ્યતોઽસ્માદ્ગુરુયુગપદન્યાસમાનસ્ય સમ્યગ્
વાર્ધાવન્તઃપુલિનનિવસદ્દ્વીપપુર્યામવેયાઃ ।
પ્રાવૃટ્કાલે વહતિ નિલયૈર્યા જલાન્યુદ્ગિરદ્ વો
મુક્તાજાલગ્રથિતમલકં કામિનીવાભ્રવૃન્દમ્ ॥ ૬૮ ॥

શ્રેણિભૂતાપણવિલુલિતવ્યક્તમુક્તામ્બુધારાઃ
કાન્તાકાન્તિસ્ફુરિતતડિતસ્તોરણેન્દ્રાયુધાઢ્યાઃ ।
નિત્યં નૃત્યપ્રહતમુરજસ્નિગ્ધગમ્ભીરનાદાઃ
પ્રાસાદાસ્ત્વાં તુલયિતુમલં યત્ર તૈસ્તૈર્વિશેષૈઃ ॥ ૬૯ ॥

ભુક્ત્વા સૌખ્યં ચતુરવનિતાગાત્રધારાગૃહસ્ત -
સ્પર્શૈઃ પુષ્પોપચનપવનશ્લિષ્ટરમ્ભાઃ પ્રપશ્યન્ ।
રોધઃ સિન્ધોરનુભવ મુદા યત્ર યોધા રમન્તે
પ્રત્યાદિષ્ટાભરણરુચયશ્ચન્દ્રહ્રાસવ્રણાઙ્કૈઃ ॥ ૭૦ ॥

ગર્જૈરૂર્જસ્વલજલનિધેઃ ક્ષોભભાવં પ્રણેષ્યન્
ક્ષેમાવાપ્તં ત્રિદશનગરં ત્વં વિશેસ્તાતપૂતમ્ ।
દ્યાવાભૂમ્યોઃ પ્રમુદચરિતં વક્તિ સાક્ષાદ્દ્રુમેષુ
સીમન્તે ચ ત્વદુપગમજં યત્ર નીપં વધૂનામ્ ॥ ૭૧ ॥

॥ અથ શ્રીદેવકપત્તનવર્ણનમ્ ॥

શસ્તીત્યેવં ગુરુપરિચિતં યત્પુરં દહ્યમાન -
ધૂપવ્યક્ત્યા ચિકુરવલયૈર્નૃત્યકૃત્કેતુહસ્તૈઃ ।
લક્ષ્મીવાસામ્બુજમહમમી ષટ્પદાસ્તે ન યદ્વા
વિત્તેશાનાં ન ખલુ ચ વયો યૌવનાદન્યદસ્તિ ॥ ૭૨ ॥

દણ્ડશ્ચૈત્યે કુસુમનિચયે બન્ધનં વિપ્રયોગો
દાતુર્ દ્વારે ચલકુટિલતા સુભ્રુવોર્નાન્યલોકે ।
કેશાસક્ત્યા(?) હ્યગુરુદહનોદ્ધૂતધૂમસ્ય મન્યે
વિત્તેશાનાં ન ખલુ ચ વયો યૌવનાદન્યદસ્તિ ॥ ૭૩॥ -
(પાઠાન્તરમ્)

રાત્રૌ યસ્યાં કથમપિ સમાનીય સઞ્ચારિકાભિ -
ર્વાસાવાસં પ્રણયિસવિધે સ્થાપિતા યા નવોઢા ।
તાસાં ભોગાદરણિ રમણે દીપમુદ્દિશ્ય મુક્તો
હ્રીમૂઢાનાં ભવતિ વિફલપ્રેરણશ્ચૂર્ણમુષ્ટિઃ ॥ ૭૪॥

લક્ષ્મ્યાઃ સ્થાનં તદિતિ મતિમાન્ વર્ધયત્યૂર્મિહસ્તૈ -
ર્મુક્તાયુક્તૈઃ પુરપરિસરે સ્વાઙ્કમાસાર્ય સિન્ધુઃ ।
તત્સુપ્રાપૈઃ કનકસિકતારાશિગુપ્તૈઃ સખીભિઃ
સઙ્ક્રીડન્તે મણિભિરમરપ્રાર્થિતા યત્ર કન્યાઃ ॥ ૭૫॥

કામાદેશાદ્ગમનસમયેઽલક્તકવ્યક્તપાદ -
ન્યાસૈર્વાસૈર્મસૃણઘુસૃણાલેપનૈર્યત્ર ભિત્તૌ ।
મુક્તાસ્રગ્ભ્યો વિલુલિતકણૈઃ કઙ્કણૈઃ શીર્ણબન્ધૈ -
ર્નૈશો માર્ગઃ સવિતુરુદયે સૂચ્યતે કામિનીનામ્ ॥ ૭૬॥

મુક્તાહારા ઇવ વરભુવઃ સન્તિ યસ્યાં વિહારાઃ
શાટી પુર્ય્યાઃ કુવલયદૃશઃ શ્રેયસી પુષ્પવાટી ।
શાલાસ્ત્યાગપ્રકૃતિકૃતિભિર્નિર્મિતાઃ શ્રીવિશાલાઃ
નિત્યજ્યોત્સ્નાપ્રતિહતતમોવૃત્તિરમ્યાઃ પ્રદોષાઃ ॥ ૭૭॥

યૈરાસઙ્ગાદિવ જલનિધેઃ પ્રાપિ રત્નાકરત્વં
સાર્ધં નિત્યં મુનિગુરુગુણોદ્ગાતૃભિસ્તેઽર્થિતીર્થામ્ ।
શ્રાન્તં તારાન્વિતમિવ દિવઃ ખણ્ડમુદ્દણ્ડપુષ્પં
બદ્ધાપાનાં બહિરુપવનં કામિનો નિર્વિશન્તિ ॥ ૭૮॥

રાજ્ઞઃસૌધાવલિષુ તપનોત્સર્પણાત્સૂર્યકાન્તૈ -
સ્તપ્તૈરુષ્મા ય ઇહ જનિતો દુષ્કલેસ્તાપરૂપઃ ।
તં ચૈત્યસ્થાઃ સપદિ શરદશ્ચન્દ્રપાદાનુવાદા -
દ્વ્યાલુમ્પન્તિ સ્ફુટજલલવસ્યન્દિનશ્ચન્દ્રકાન્તાઃ ॥ ૭૯॥

ધન્યાસ્તેઽસ્યાં પ્રતિદિનમહો શ્રીગુરોર્વક્રપદ્માન્

પ્રાપ્તસ્યન્દં પ્રવચનરસં યે નિપીયૈવ ભવ્યાઃ ।
શ‍ૃણ્વન્ત્યુચ્ચૈઃ પદરચનયા ગાયનોદ્ગીતકીર્તિં
ત્વદ્ગમ્ભીરધ્વનિષુ શનકૈઃ પુષ્કરેષ્વાહતેષુ ॥ ૮૦॥

પીનોત્તુઙ્ગસ્તનપરિચયો કઞ્ચુકઃ પુષ્પજાલૈઃ
પત્રૈશ્ચિત્રૈર્ભવતિ રસના પલ્લવૈઃ શેખરશ્રીઃ ।
આમ્રો ભૃઙ્ગાવલિવલયિતેઽસ્મિન્ યુગે સાતિરેક -
મેકઃ સૂતે સકલમબલામણ્ડનં કલ્પવૃક્ષઃ ॥ ૮૧॥

વાતોદ્ધાન્તૈઃ સલિલપૃષતૈઃ ક્ષોભયન્તો મૃગાક્ષી -
ર્ગાતું વૃત્તા ગુરુગુણપદં પુષ્પલાવણ્યભાજઃ ।
સાધ્વીસ્પર્શાદિવ કલુષિતાસ્તોયદા યત્ર જાલૈ -
ર્ધૂમોદ્ગારાનુકૃતિનિપુણા જર્જરા નિષ્પતન્તિ ॥ ૮૨॥

કામોઽપિ સ્વં પ્રગુણયતિ નો કાર્મુકં પુષ્પરૂપં
મૌર્વીભઙ્ગાદિવ નવવધૂશ્વાસલોભાદલીનામ્ ।
યૂનાં ચેતો વ્યથનનિપુણૈઃ કાક્ષબાણૈઃ સનાથૈ -
સ્તસ્યારમ્ભશ્ચતુરવનિતાવિભ્રમૈરેવ સિદ્ધઃ ॥ ૮૩॥

તસ્યાં વપ્રઃ સુરગિરિગુરુઃ કાઞ્ચનઃ કાઞ્ચનાભાં
તુઙ્ગૈઃ શ‍ૃઙ્ગૈર્વહતિ તરણેરપ્યનુલ્લઙ્ઘનીયઃ ।
યન્મૂર્ધસ્તૈ રસિકપુરુષૈઃ સ્પૃશ્યતે સ્વર્ગતોઽપિ
હસ્તપ્રાપ્યસ્તબકનમિતો બાલમન્દારવૃક્ષઃ ॥ ૮૪॥

સિન્ધોસ્તત્રાનુજ ઇવ લસદ્વીચિવાસાસ્તડાગ
ઉદ્યાનાન્તસ્તરુણવયસો દીર્ઘિકાસ્તસ્ય કાન્તાઃ ।
તાસાં ચઞ્ચન્નયનનલિનૈર્મોહિતા માનસામ્ભો
ન ધ્યાસ્યન્તિ વ્યપગતશુચસ્ત્વામપિ પ્રેક્ષ્ય હંસાઃ ॥ ૮૫॥

બદ્ધોત્સાહા ગમનગહને વાતવદ્વાદિરાજી
રાજ્ઞઃ સ્વર્ણાભરણસુભગઃ સામજાનાં સમૂહઃ ।
યસ્યાં દાનસ્રવણનિયતોદસ્તહસ્તઃ પ્રશસ્તઃ
પ્રેક્ષ્યોપાન્તસ્ફુરિતતડિતં ત્વાં તમેવ સ્મરામિ ॥ ૮૬॥

નવ્યો ભવ્યૈર્મરકતશિલાનિર્મિતોઽસ્ત્યાશ્રમોઽસ્યાં
ગર્જદ્વાનાનુગતમુરજઃ સાધુનાથૈઃ સનાથઃ ।
નિત્યં વ્યાખ્યાપરિષદિ વૃતં તોરણૈઃ કાઞ્ચનીયૈઃ

પ્રેક્ષ્યોપાન્તસ્ફુરિતતડિતં ત્વાં તમેવ સ્મરામિ ॥ ૮૭॥ -
(પાઠાન્તરમ્)

॥ અથ શ્રીગુરુવર્ણનમ્ ॥

તત્રાસ્માકં વિભુરભિનવૈઃ પાત્રવૃન્દૈઃ પરીતઃ
સ્ફીતચ્છાયો વકુલકમલાં સન્નિદત્તે પ્રતીકૈઃ ।
કિન્ત્વક્ષુબ્ધો મનસિ ભગવાંશ્ચારુનાર્યા વિલાસૈઃ
કાઙ્ક્ષત્યન્યો વદનમદિરાં દોહદચ્છદ્મનાસ્યાઃ ॥ ૮૮॥

નમ્રાનેકક્ષિતિપતિશિરોમૌલિરત્નૈર્નખાનાં
સંયોગેન પ્રભુચરણયોર્જાયતે સા વિભૂષા ।
વ્યક્તેર્બીજં નટનરુચિતશ્ચન્દ્રકાણાં પ્રચારૈ -
ર્યામધ્યાસ્તે દિવસવિગમે નીલકણ્ઠઃ સુહૃદ્ વઃ ॥ ૮૯॥

નિત્યાહ્લાદૈઃ શ્રમણમણિભિસ્તત્ર સેવ્યાંહ્રિપદ્મ -
સ્તેજોરાશિઃ પ્રસૃમરયશા રાજતે સૂરિસૂર્યઃ ।
યદ્દૂરસ્થો વિદુરમઘવાડપ્યાપ્નુતે તાં ન શોભાં
સૂર્યાપાયે ન ખલુ કમલં પુષ્યતિ સ્વામભિખ્યામ્ ॥ ૯૦॥

ગત્વા સૂર્યોદયનપુરતસ્તત્ર શોણાણુમૂર્ત્યા
ભક્તિં ચન્દ્રોદયરચનયા વ્યઞ્જયન્નસ્ય સૂરેઃ ।
દર્શં દર્શં વદનમલસાં મોદપૂર્ણં મોદપૂર્ણાં પુનીથાઃ
ખદ્યોતાલી વિલસિતનિભાં વિદ્યુદુન્મેષદૃષ્ટિમ્ ॥ ૯૧॥

યસ્ય બ્રહ્મવ્રતમતિરતં બિભ્રતશ્ચિત્તવૃત્તિં
શચ્યાસ્તસ્યા અપિ મધુરતા નેતુમીશા ન મોહમ્ ।
પીનોરોજા સરસિજમુખી ક્ષામમધ્યાડડયતાક્ષી
યા તત્ર સ્યાદ્ યુવતિવિષયે સૃષ્ટિરાદ્યેવ ધાતુઃ ॥ ૯૨॥

પ્રાપ્તક્ષોભા વિજયિનિ ગુરૌ દેવનામ્નીહ પૂર્વં
મોહાદીનામસમપરિષચ્છઙ્કયા શઙ્કુકલ્પા ।
સામ્રાજ્યેડસ્ય પ્રશમપવનૈર્વેપમાનાં ભયાત્તાં
જાતાં મન્યે તુહિનમથિતાં પદ્મિનીં વાન્યરૂપામ્ ॥ ૯૩॥ var શિશિરમથિતાં

સ્વામિન્યસ્મિન્નધિગતવતિ પ્રાજ્યસામ્રાજ્યલક્ષ્મીં
કીર્ત્તિક્ષીરૈર્જગતિ બહુલૈઃ પ્લાવિતં પઙ્કજાલમ્ ।

તસ્યા લેપાદિવ ખલમુખં શ્યામિકા વ્યાપ્તિદમ્ભા -
દિન્દોર્દૈન્યં ત્વદનુસરણક્લિષ્ટકાન્તેર્બિભર્તિ ॥ ૯૪॥

॥ અત્રાન્તરે સ્વામિચરિતં કિઞ્ચિદુચ્યતે ॥

જમ્બૂદ્વીપે ભરતવસુધામણ્ડનં કચ્છદેશો
યત્રામ્ભોધિર્ભુવમનુકલં પૂજયત્યેવ રત્નૈઃ ।
પૃચ્છન્ પૂતા જનનલલનૈઃ સૂરિણા યૈરમૂનિ
કચ્ચિત્ ભર્તુઃ સ્મરસિ રસિકે ત્વં હિ તસ્ય પ્રિયેતિ ॥ ૯૫॥

ચિન્તામણ્યાહ્વયજિનયશો ગાતુકામેક્ષુવાટે
શાલેયે વા જનયતિ ભૃશં ગોપિકા સિદ્ધમોહમ્ ।
વીણાપાણિર્લયમુપગતા તદ્ગુણૈર્યત્ર રાગા -
દ્ભૂયો ભૂયઃ સ્વયમપિ કૃતાં મૂર્ચ્છનાં વિસ્મરન્તી ॥ ૯૬॥

આસ્તે તસ્મિન્નગરમુદિતં શ્રીમનોરમ્યનામ
યોગે દૂરાદુપગતવતાં યત્ર સાંયાત્રિકાણામ્ ।
લોકે રાત્રિં નયતિ લવવત્તદ્વધૂસ્તત્ર દેશે
તામેવોષ્ણૈર્વિરહજનિતૈરશ્રુભિર્યાપયન્તી ॥ ૯૭॥

તત્ર શ્રેષ્ઠી શિવગુણ ઇતિ પ્રેયસી તસ્ય ભાણણી
તદ્વેશ્મોત્થૈર્મણિભરકરૈર્લોહિતે વ્યોમભાગે ।
પ્રાતર્ભ્રાન્ત્યા ગમયતિ તમીં કોકકાન્તાશુભોગૈ -
સ્તામેવોષ્ણૈર્વિરહજનિતૈરશ્રુભિર્યાપયન્તી ॥ ૯૮॥ -
(પાઠાન્તરમ્)

સુપ્તાન્યેદ્યુઃ કુસુમતલિને શ્રેષ્ઠિનઃ કામિની સા
સ્વપ્ને સિંહં ત્રિદશમહસાપન્નસત્વા દદર્શ ।
હર્ષોલ્લાસાદ્વિકચનયને કિઞ્ચિદાકુઞ્ચ્ય નિદ્રા -
માકાઙ્ક્ષન્તીં નયનસલિલોત્પીડરુદ્ધાવકાશામ્ ॥ ૯૯॥

પ્રાસૌત્સૂનું જયમિવ શચી દ્યૌરિવેન્દું સમગ્રં
ભર્તુસ્તસ્માદતિશયિરસાદ્વલ્લભત્વં ગતા સા ।
ગાયત્યુચ્ચૈર્હસતિ રમતે મોદતે સ્માલિવર્ગૈઃ
પ્રાયેણૈતેઽરમણવિરહેષ્વઙ્ગનાનાં વિનોદાઃ ॥ ૧૦૦॥

સ્ફીતો બાલઃ સુરતરુરિવાનુક્રમાદ્વૈરિસિંહે -

ત્યાખ્યાં બિભ્રદ્વિજયપદતો દેવસૂરેઃ કદાચિત્ ।
વાક્યૈર્બુદ્ધ્વા પ્રણયવિવશાં માતરં પ્રાહ દાન્ત -
સ્તામુન્નિદ્રામવનિશયનાસન્નવાતાયનસ્થઃ ॥ ૧૦૧॥

મતર્યાચે વિષયવિરતસ્ત્વન્નિવેશં વ્રતાય
માયાજાલં વિકૃતિવિરસં કસ્ય નોદ્વેગહેતુઃ ।
સ્રી વિક્ષેપ્તું વિરહવિકૃતાં ન પ્રગલ્ભાऽપિ શક્તા
ગલ્લાભોગાત્ કઠિનવિષમામેકવેણીં કરેણ ॥ ૧૦૨॥ var ગણ્ડાભોગાત્

શ્રુત્વાऽકસ્માદિતિ સુતવચો વિદ્યુદાપાતકલ્પં
મૂર્ચ્છાऽતુચ્છવ્યથનકથનૈઃ સઙ્કુચદ્વિસ્મિતાક્ષી ।
જાતામાતાऽવચનવિષયાऽસહ્યદુઃખાભિઘાતાત્
સાભ્રેऽહ્નીવ સ્થલકમલિનીં ન પ્રબુદ્ધાં ન સુપ્તા ॥ ૧૦૩॥

માતુર્દુઃખોદયમપદયં ભાવયિત્વા કુમારો
વીરેત્યાખ્યામિવ નિયમયન્ ભાવિનીં વર્ધમાનઃ ।
પિત્રો સત્ત્વે વ્રતપરિચયો નેત્યયં નિશ્ચિકાય
પ્રાયઃ સર્વો ભવતિ કરુણાવૃત્તિરાર્દ્રાન્તરાત્મા ॥ ૧૦૪॥

માતાપિત્રોર્દિવિ પરિગમે સ સ્વયં પ્રાત્તદીક્ષ -
શ્ચક્રે વક્રેતરમતિધૃતિઃ સૂરિરાજા સ્વશિષ્યઃ ।
તસ્ય જ્ઞાનં ચરણમરુણપ્રૌઢતેજં સ્તુમઃ કિં
પ્રત્યક્ષં તે નિખિલમચિરાદ્ ભ્રાતરુક્તં મયા યત્ ॥ ૧૦૫॥

પટ્ટે ન્યસ્તઃ સ ઇહ ગુરુણ બન્દિરે ગન્ધપુર્યાં
ખૈકાદ્રીલા ૧૭૧૦ શરદિ સમહં રાધસમ્યગ્દશમ્યામ્ । ?
લોકૈસ્તત્રાનિમિષસમતા ??? નેત્રે યદેતન્ - two syllables missing
મીનક્ષોભાચ્ચલકુવલયશ્રીતુલામેષ્યતીતિ ॥ ૧૦૬॥

મત્વા ગચ્છે વરસરસિ નઃ સોऽયમુદ્ભૂતપદ્મેऽ -
મીનક્ષોભાચ્ચલકુવલયશ્રીતુલામેષ્યતીતિ ॥ ૧૦૬॥ -
(પાઠાન્તરમ્) last two lines

સોયં સ્વામી વિજયપદતઃ શ્રીપ્રભેત્યાહ્વયૈવ
લક્ષ્મ્યા વાણ્યા જયતિ નિલયો દર્શનાદસ્ય પૂર્વમ્ ।
વાર્ત્તાં વક્તું કૃતનરતનોર્દક્ષિણસ્તે શુભાય
યાસ્યત્યૂરુઃ સરસકદલીસ્તમ્ભગૌરશ્ચલત્વમ્ ॥ ૧૦૭॥

એતદ્વૃત્તં સુરશિખરિણસ્તુઙ્ગશૃઙ્ગેષુ સિદ્ધૈ -
ર્ગીતં પીત્વા પરમરસિકા સ્વર્જનાનાં વધૂટ્યઃ ।
રમ્ભાસ્તમ્ભાઽઽલયમુપગતા ભર્તૃયોગે ભજન્તિ
સદ્યઃ કણ્ઠચ્યુતભુજલતાગ્રન્થિ ગાઢોપગૂઢમ્ ॥ ૧૦૮॥

તેજઃપુઞ્જૈર્દિનકરકરસ્પર્દ્ધિભિર્દુર્નિરીક્ષ્યં
શાન્તસ્વાન્તં તપનરપતિં પ્રાપ્ય નમ્રીકૃતાઙ્ગઃ ।
અત્રોદ્ભૂતાં સુકૃતસરસાં કિંવદન્તીં વિદગ્ધો
વક્તું ધીરસ્તનિતવચનૈર્માનિનીં પ્રક્રમેથાઃ ॥ ૧૦૯॥

પ્રાતુર્ભૂતે દિનમુખસખે સૌરતેજસ્ત્રિધાઽપિ
વિશ્વં વ્યાપ્તં કથયતિ મહીનાથ ! નાન્દી વિશેષઃ ।
કામક્રીડાનિરતમિથુનાયુત્સૃજંસ્ત્યક્તનિદ્રં
મન્દ્રસ્નિગ્ધૈર્ધ્વનિભિરબલાવેણિમોક્ષોત્સુકાનિ ॥ ૧૧૦॥

સભ્યાસ્થાયામિહ ભગવતીપાઠપૂર્વોત્તરાધ્યા -
ધ્યાયવ્યાખ્યા ભવતિ તદનુ શ્રીગુરોર્ગીતવૃત્તૈઃ ।
ગન્ધર્વાલી સુખયતિ જનં સોત્સવં શ્રોત્રપેયૈઃ
કાન્તોદન્તઃ સુહૃદુપહૃતઃ સઙ્ગમાત્કિઞ્ચિદૂનઃ ॥ ૧૧૧॥

શિષ્યાધ્યાયોઽવ્રતવિરમણં તત્ર બાપૂર્દિદેશ
કીર્ત્યઙ્કૂરાનિવ રજતજદ્વાદશોદ્યદ્દશાઙ્કાન્ ।
વાત્સલ્યાનિ પ્રવરવસનૈર્નામજાપોઽર્હદાદેઃ
પૂર્વાભાષ્યં સુલભવિપદાં પ્રાણિનામેતદેવ ॥ ૧૧૨॥ var સુરલવિપદાં

અર્હત્પૂજાકુસુમરચનૈર્નન્ધમન્દોત્સવશ્રી -
ર્દાનં પાત્રેષ્વભયસહિતં ભાવના ભાવનાટ્યમ્ ।
પર્વણ્યેવં નવનવભવૈર્વાર્ષિકે કલ્પપાઠઃ
પૂર્વાભાષ્યં સુલભવિપદાં પ્રાણિનામેતદેવ ॥ ૧૧૩॥ var સુરલવિપદાં

(પાઠાન્તરમ્)

કર્તું કશ્ચિત્સ્પૃહયતિ પુનસ્તીર્થયાત્રાં સસઙ્ઘં
કશ્ચિદ્વોઢું વ્રતવિધિભરં વોપધાનાણિ કાચિત્ ।
ઇત્થં સઙ્ઘો ગુરુગુરુલસદ્ભક્તિરદ્યાપિ ધર્મે
સઙ્કલ્પૈસ્તૈર્વિશતિ વિધિનાઽવૈરિણાઽરુદ્ધમાર્ગઃ ॥ ૧૧૪॥

એવં નિત્યોત્સવપરિચયૈરાશ્રિતોઽપિ પ્રકામં
મેઘઃ શિષ્યો ગુરુપદયુગાસેવયા વિપ્રયુક્તઃ ।
સર્વં બાહ્યં મનસિ રસિકો મન્યમાનઃ સુનેત -
સ્ત્વામુત્કણ્ઠાવિરચિતપદં મન્મુખેનેદમાહ ॥ ૧૧૫॥

પૂર્ણાચન્દ્રસ્તવ મુખવિભાં ભાવયત્યેષ પૂર્ણાં
તેજસ્વિત્વં સ્પૃશતિ  તરણિર્ધીરતાં મેરુરદ્રિઃ ।
અમ્ભોવાહઃ પ્રવહતિ તથાઽન્યોપકારપ્રકારં
હન્તૈકસ્થં ક્વચિદપિ ન તેઽભીરુસાદૃશ્યમસ્તિ ॥ ૧૧૬॥

તસ્માદસ્માદૃશજનમનસ્ત્વન્નિરીક્ષામૃતેન
દિષ્ટ્યા પુષ્ટં ક્વચિદપિ રતિં નાપ્નુતે વસ્તુગત્યા ।
નામાલમ્બાત્સહમહમહો વાસરાણિ વ્રજન્તિ
દિક્સંસક્તપ્રવિરલઘનવ્યસ્તસૂર્યાતપાનિ ॥ ૧૧૭॥

રાકાચન્દ્રેઽભ્યુદયિનિ ભવદ્વક્ત્રમારોપ્ય બુધ્યા
ધ્યાનાધીનઃ ક્ષણમપિ સુખં ચેતસિ સ્થાપયામિ ।
અશ્રૈસ્તાવન્મુહુરુપચિતૈર્દૃષ્ટિરાલુપ્યતે મે
ક્રૂરસ્તસ્મિન્નપિ ન સહતે સઙ્ગમં નૌ કૃતાન્તઃ ॥ ૧૧૮॥

વક્ત્રાર્થં તે સમધિત વિધિઃ શારદેન્દોર્વિભૂષાં
સારઙ્ગાક્ષ્ણોર્નયનવિધયે તદ્વયોર્યોગ આસીત્ ।
વ્યોમારણ્યે તુહિનકપટાદિન્દુકાન્તાઽરુદત્તન્
મુક્તાસ્થૂલાસ્તરુકિસલયેષ્વશ્રુલેશાઃ પતન્તિ ॥ ૧૧૯॥

દાસીભૂતં પ્રભુનવયશો જ્યોતિષાં પુણ્ડરીક -
ખણ્ડં મન્યે સરસિ હસિતં નિર્મિમેતે સમીરાન્ ।
આમોદાઢ્યાન્ વરુણકકુભઃ પૂર્વભાગેઽભ્યુપેતાન્
પૂર્વં સ્પૃષ્ટં યદિ કિલ ભવેદઙ્ગમેભિસ્તવેતિ ॥ ૧૨૦॥

જાને દિગ્ભિઃ પવનચમરૈર્વીજ્યસે ત્વં તદેતા -
શ્ચન્દ્રો જ્યોત્સ્નામલયજરસૈરર્ચયન્ પશ્ચિમાયામ્ ।
નત્વેવૈવં વદતિ ભગવદ્વન્દને વૃત્તિભાજો
નીચૈર્ગચ્છત્યુપરિ ચ દશા ચક્રનેમિક્રમેણ ॥ ૧૨૧॥

પૃથ્વીપાથઃ પવનતરવશ્ચન્દ્રસૂર્યાદિદેવા -
સ્ત્વાં સેવન્તે બહુરચનયા દૂરતોઽપિ પ્રશસ્તાઃ ।

મત્સત્વં વા ગગનશકલં દૂયતે કેવલં યદ્
ગાઢોષ્માભિઃ કૃતમશરણં ત્વદ્વિયોગવ્યથાભિઃ ॥ ૧૨૨॥

ચેતોવાક્યે મમ નિગદતોઽન્યોન્યમાશ્વાસનાય
ધ્યાનાધીનૈઃ સ્તવનકથનૈર્નીયતે દિષ્ટમેવમ્ ।
પશ્ચાત્સાક્ષાત્સુભગ ! ભગવત્સઙ્ગમે સર્વવૃત્તં
નિર્વેક્ષ્યાવઃ પરિણતશરચ્ચન્દ્રિકાસુ ક્ષપાસુ ॥ ૧૨૩॥

ધન્યાં મન્યસ્તદુષસિ વિભો ! સ્યામહં વિશ્વવિશ્વે
યસ્યાં રાત્રૌ લયનિલયગઃ સંલયે ત્વાં નિષેવે ।
તાં નિદ્રામપ્યતિશયમુદા સંસ્તુવે ધ્યાનમુદ્રાં
દૃષ્ટઃ સ્વપ્નેઽકિતવ ! રમયન્ કામપિ ત્વં મયેતિ ॥ ૧૨૪॥

બાલસ્યાઽનુક્ષણકૃતનતેર્મે સ્વવિજ્ઞપ્તિરેષા
ભાવ્યા સ્વામિન્ ! હૃદયવિષયે સન્નિધેયો વિધેયઃ ।
અર્યાશ્ચર્યાનુગતમનસો વર્તમાને યદર્થા -
દિષ્ટે વસ્તુન્યુપચિતરસાઃ પ્રેમરાશી ભવન્તિ ॥ ૧૨૫॥

વિજ્ઞપ્યૈવં પ્રવચનનૃપં શ્રીવિનીતાભિધાનો -
પાધ્યાયેન્દ્રૈર્વિપુલમતિભિઃ સેવિતં તન્નિવૃત્તઃ ।
તત્પ્રત્યુક્તાનુનમનમુખોદન્તવૃન્દૈર્મમાપિ
પ્રાતઃ કુન્દપ્રસવશિથિલં જીવિતં ધારયેથાઃ ॥ ૧૨૬॥

એવં દેવ ! ત્વયિ વિનિહિતં કાર્યમાર્યં વિચાર્ય
વ્યક્તાં શક્તિં સહૃદયસુહૃત્ ! તાવકીમત્ર ચાર્થે ।
અઙ્ગીકારં દ્રઢયતિ તવાધ્વાનધારાપ્રસારઃ
પ્રત્યુક્તં હિ પ્રણયિષુ સતામીપ્સિતાર્થક્રિયૈવ ॥ ૧૨૭॥

પૂર્વં મોદાત્તપનૃપતિનામે સ્વસેવાકુમારી
સૌભાગ્યાઢ્યા પ્રણયસરસોદ્વાહિતા તદ્વિયુક્તેઃ ।
તાપં હૃત્વા વિચર જલદાભીષ્ટદેશાન્ યથેચ્છં
મા ભૂદેવં ક્ષણમપિ ચ તે વિદ્યુતા વિપ્રયોગઃ ॥ ૧૨૮॥

સ્થિત્વાસ્થાયાં મુનિપતિપુરોઽસૌ નિસૃષ્ટાર્થરૂપી
દિવ્યધ્વાનૈર્જલધરવરો વાચિકં વ્યાચચક્ષે ।
જાતસ્તસ્માન્મુનિનરપતિઃ સપ્રસાદો વિનેયે
કેષાં ન સ્યાદભિમતફલા પ્રાર્થના હ્યુત્તમેષુ ॥ ૧૨૯॥

પ્રત્યાગત્ય પ્રણયિહૃદયામ્ભોધરેણાદરેણા -
દિષ્ટાં વાર્તાં ગુરુગુરુતરાનુગ્રહવ્યઞ્જનીં સઃ ।
શ્રુત્વા જ્ઞાનાચરણચરણોદ્ભૂતભાગ્યપ્રતિષ્ઠાન્
ભોગાનિષ્ટાનવિરતસુખં ભોજયામાસ શશ્વત્ ॥ ૧૩૦॥

માઘકાવ્યં દેવગુરોર્મેઘદૂતં પ્રભપ્રભોઃ ।
સમસ્યાર્થં સમસ્યાર્થં નિર્મમે મેઘપણ્ડિતઃ ॥ ૧૩૧॥

॥ ઇતિ મહામહોપાધ્યાયશ્રીમેઘવિજયવિરચિતો
શ્રીમેઘદૂતસમસ્યાલેખઃ સમ્પૂર્ણઃ ॥

Encoded and proofread by Pallasena Narayanaswami ppnswami at gmail.com

*meghadUtasamasyAlekhaH by Meghavijaya*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*